# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा – जुलाई - २०२१

| | | |
|---|---|---|
| कक्षा – शास्त्री-3 | प्रश्नपत्रम् – 5 | गुणाः – ५० |
| विषयः – पौरोहित्यम् | सत्रम् – 6 | समयः – १० तः १२ |
| दिनाङ्कः – १७/०७/२०२१ | सन्दर्भग्रन्थः – याज्ञिकन्यायमाला | |

**सूचना - निम्नलिखितेषु दशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः ।**
**प्रत्येकं प्रश्नस्य समानगुणाः । (१०)**

**प्रश्नः १ अधोलिखितेषु द्वयोः श्लोकयोः व्याख्या कार्या ।**

१ याज्ञिकं जन्म सोमीयं किं वान्यदिति चिन्त्यताम् ।
वेदैस्त्रिभिः कृतो यज्ञ इति दीक्षैव याज्ञिकम् ॥
२ प्रणवस्तान्त्रिके मन्त्रे ह्यादौ योज्यो न वा भवेत् ।
मन्त्रत्वाद् युज्यते नैवं तन्त्रेष्वक्षरनिश्चयः ॥
३ नान्दीश्राद्धं यत्र नैव तत्र षोडशमातरः ।
पूज्या न वेति सन्देहे श्राद्धाङ्गत्वान्न पूजनम् ॥

**प्रश्नः २ मन्त्रपेटिकायाः सारांशं लिखत ।**

**प्रश्नः ३ अभ्युदयपेटिकायाः विषयवस्तु प्रस्तूयताम् ।**

**प्रश्नः ४ कयोरपि द्वयोः श्लोकयोः व्याख्या कार्या ।**

१ विहिता दृश्यते तेन सच्छलोकाः स्मृतिहेतवः ।
भावनादार्ढ्यं कर्तारौ विरुद्ध्यन्ते न शास्त्रतः ॥
२ स्तोत्रेषु कर्तृनाम स्युः प्रार्थनाद्यास्तदिच्छया ।
तद्वक्तव्यं न वा नैव वक्तव्यं ह्यर्थभेदतः ॥
३ अन्नानि पत्रपुष्पादि फलान्नेषु प्रगृह्यताम् ।
तेन वैणवनीवार बकुलासूपसङ्ग्रहः ॥

**प्रश्नः ५ पूर्णफलार्पणाधिकरणं यथाशास्त्रं विवेचयत ।**

प्रश्नः ६ हविष्यान्नव्यवस्थाधिकरणं वर्णयत ।

**प्रश्नः ७ कयोरपि द्वयोः श्लोकयोः व्याख्या कार्या।**

१ गयाश्राद्धोत्तरं श्राद्धं पिण्डं ब्राह्मणभोजनम्।
न कर्तव्यं विधेयं वा माहात्म्येऽकरणीयता॥

२ अथापि दशगात्रस्य कर्म पोषणकारकम्।
जीवस्य योनि देहे स्यात् तस्मात्तत्स प्रयोजनम्॥

३ देवं शब्दात्मकं ध्यात्वा द्रढिम्ना यतते तथा।
श्रुतावुत्सर्गरूपेण युक्तं कर्म फलप्रदम्॥

**प्रश्नः ८ फलपेटिकायाः महत्त्वं प्रदर्शयत।**

**प्रश्नः ९ श्राद्धपेटिकायाः वैशिष्ट्यमुपपादयत।**

**प्रश्नः १० दशानां एकवाक्येन उत्तरं लिखत।**

१ याज्ञिकन्यायमालायां कति अध्यायाः सन्ति ?
२ ॐकारस्य संयोगः कुत्र भवेत् ?
३ स्वतन्त्रपूजनाधिकारणे कति मातरः ?
४ कति वसोर्धाराः पूज्याः ?
५ उपनयने दण्डस्य प्रयोजनं किम् ?
६ 'लौकिक' इति शब्दस्य कोऽर्थः ?
७ विष्णुरुद्रादियागेषु केषां मन्त्राणां प्रयोगः क्रियते ?
८ 'पूर्णफलार्पणं देवपूजादौ' कस्य मतमस्ति ?
९ ताम्बूलसमर्पणं केषु उपचारेषु भवति ?
१० फलाहारे किं फलं नेतव्यम् ?
११ श्राद्धः कुत्र कर्तव्यः ?
१२ यागादिकर्मणः फलं कदा प्राप्नोति ?
१३ देवतानां विग्रहः भवति न वा ?
१४ दर्शपूर्णमासाभ्यां किं फलमश्नुते ?
१५ ग्रन्थकारस्य नाम किम् ?

****